खादिर गृह्य सूत्रम्
द्राह्यायणगृह्यसूत्रम्

अथातो गृह्या कर्माणि १ उदगयनपूर्वपक्षपुण्याहेषु प्रागावर्तनादह्नः कालोऽनादेशे २ अपवर्गे यथोत्साहं ब्राह्मणानाशयेत् ३ यज्ञोपवीतम् ४ सौत्रम् ५ कौशं वा ६ ग्रीवायां प्रतिमुच्य दक्षिणं बाहुमुद्धृत्य यज्ञोपवीती भवति ७ सव्यं प्राचीनावीती ८ त्रिराचम्यापो द्विः परिमृजीत ९ पादावभ्युक्ष्य शिरोऽभ्युक्षेत् १० इन्द्रियाण्यद्भिस्संस्पृशेत् ११ अन्ततः प्रत्युपस्पृश्य शुचिर्भवति १२ आसनस्थानसंवेशनान्युदगग्रेषु दर्भेषु १३ प्राङ्मुखस्य प्रतीयात् १४ पश्चादग्नेर्यत्र होमस्स्यात् १५ सहशिरसं स्नानशब्दे १६ दक्षिणेन पाणिना कृत्यमनादेशे १७ मन्त्रान्तमव्यक्तं परस्यादिग्रहणेन विद्यात् १८ स्वाहान्ता मन्त्रा होमेष १९ पाकयज्ञ इत्याख्या यः कश्चैकाग्नौ २० तत्रर्त्विग्ब्रह्मा सायंप्रातर्होमवर्जम् २१ स्वयं हौत्रम् २२ दक्षिणतोऽग्नेरुदङ्मुखस्तूष्णीमास्ते ब्रह्माऽऽहोमात्प्रागग्रेषु २३ कामं त्वधियज्ञं व्याहरेत् २४ अयज्ञियां वा व्याहृत्य महाव्याहृतीर्जपेत् २५ इदं विष्णुरिति वा २६ हौत्रब्रह्मत्वे स्वयं कुर्वन् ब्रह्मासनमुपविश्य छत्रमुत्तरासङ्गं कमण्डलुं वा तत्र कृत्वाऽथान्यत्कुर्यात् २७ अव्यावृत्तिं यज्ञाङ्गैरव्यवायं चेच्छेत् २८

इति प्रथमः खण्डः १

पूर्वे भागे वेश्मनो गोमयेनोपलिप्य तस्य मध्यदेशे लक्षणं कुर्यात् १ दक्षिणतः प्राचीं लेखामुल्लिख्य २ तदारम्भादुदीचीं तदवसानात्प्राचीं तिस्रो मध्ये प्राचीः ३ तदभ्युक्ष्य ४ अग्निमुपसमाधाय ५ इमं स्तोममिति परिसमूह्य तृचेन ६ पश्चादग्नेर्भूमौ न्यञ्चौ पाणी कृत्वेदं भूमेरिति ७ वस्वन्तं रात्रौ ८ पश्चाद्दर्भानास्तीर्य दक्षिणतः प्राचीं प्रकर्षेदुत्तरतश्च ९ अप्रकृष्य वा १० पूर्वोपक्रमं प्रदक्षिणमग्निं स्तृणुयान्मूलान्यग्रैश्छादयंस्त्रिवृतं पञ्चवृतं वा ११ उपविश्य दर्भाग्रे प्रादेशमात्रे प्रच्छिनत्ति न नखेन पवित्रे स्थो वैष्णव्याविति १२ अद्भिरुन्मृज्य विष्णोर्मनसा पूते स्थ इति १३ उदगग्रे अङ्गुष्ठाभ्यामनामिकाभ्यां च सङ्गृह्य त्रिराज्यमुत्पुनाति देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिरिति १४ अभ्युक्ष्यैते अग्नावनुप्रहरेत् १५ आज्यमधि-

श्रित्योत्तरतः कुर्यात् १६ दक्षिणजान्वक्तो दक्षिणेनाग्निमदितेऽनुमन्यस्वेत्युद-
काञ्जलिं प्रसिञ्चेत् १७ अनुमतेऽनुमन्यस्वेति पश्चात् सरस्वत्यनुमन्यस्वेत्युत्तरतः
१८ देव सवितः प्रसुवेति प्रदक्षिणमग्निं पर्युक्षेदभिपरिहरन् हव्यम् १९ सकृ-
त्त्रिर्वा २० समिधमाधाय २१ प्रपदं जपित्वोपताम्य कल्याणं ध्यायन् वैरू-
पाक्षमारभ्योच्छ्वसेत् २२ प्रतिकामं काम्येषु २३ सर्वत्रैतद्धोमेषु कुर्यात् २४

इति द्वितीयः खण्डः

ब्रह्मचारी वेदमधीत्योपन्याहृत्य गुरवेऽनुज्ञातो दारान् कुर्वीत १ आप्लवनं च
२ तयोराप्लवनं पूर्वम् ३ मन्त्राभिवादात्तु पाणिग्रहणस्य पूर्वं व्याख्यातम् ४
ब्राह्मणस्सहोदकुम्भः प्रावृतो वाग्यतोऽग्रेणाग्निं गत्वोदङ् मुखस्तिष्ठेत् ५
स्नातामहतेनाच्छाद्य या अकृन्तन्नित्यानीयमानायां पाणिग्राहो जपेत्
सोमोऽददिति ६ पाणिग्राहस्य दक्षिणत उपवेशयेत् ७ अन्वारब्धायां
स्रुवेणोपघातं महाव्याहृतिभिराज्यं जुहुयात् ८ समस्ताभिश्चतुर्थीम् ९ एवं
चौलोपनयनगोदानेषु १० अग्निरेतु प्रथम इति षड्भिश्च पाणिग्रहणे ११
नाज्यभागौ न स्विष्टकृदाज्याहुतिष्वनादेशे १२ सर्वत्रोपरिष्टान्महाव्याहृतिभिः
१३ प्राजापत्यया च १४ प्रायश्चित्तं जुहुयात् १५ हुत्वोपोत्तिष्ठतः १६ अनुपृष्ठं
गत्वा दक्षिणतोऽवस्थाय वध्वञ्जलिं गृह्णीयात् १७ पूर्वा माता
शमीपलाशमिश्राँल्लाजाञ्छूर्पे कृत्वा १८ पश्चादग्नेर्दृषत्पुत्रमाक्रमयेद्वधूं
दक्षिणेन प्रपदेनेममश्मानमिति १९ सकृद्गृहीतमञ्जलिं लाजानां वध्व-
ञ्जलावावपेद् भ्राता २० सुहृद्वा कश्चित् २१ तं साऽग्नौ जुहुयादविच्छिद्याञ्जलिं
इयं नारीति २२ अर्यमणं पूषणमित्युत्तरयोः २३ हुते तेनैव गत्वा प्रदक्षिणमग्निं
परिणयेत् कन्यला पितृभ्य इति २४ अवस्थानप्रभृत्येवं त्रिः २५ शूर्पेण
शिष्टानग्नावोप्य प्रागुदीचीमुत्क्रमयेत् एकमिष इति २६ ईक्षकावेक्षणरथा-
रोहणदुर्गानुमन्त्रणान्यभिरूपाभिः २७ अपरेणाग्निमौदको गत्वा पाणिग्राहं
मूर्धन्यवसिञ्चेत् २८ बधूं च २९ समञ्जन्त्वित्यवसिक्तः ३० दक्षिणं पाणिं
साङ्गुष्ठं गृह्णीयात् गृभ्णामि त इति षड्भिः ३१

इति तृतीयः खण्डः

प्रागुदीचीमुद्वहेत् १ ब्राह्मणकुलेऽग्निमुपसमाधाय पश्चादग्नेर्लोहितं चर्मानडु-

हमुत्तरलोम प्राग्ग्रीवमास्तीर्य वाग्यतामुपवेशयेत् २ प्रोक्ते नक्षत्रेऽन्वारब्धायां स्रुवेणोपघातं जुहुयात् षड्भिर्लेखाप्रभृतिभिस्सम्पातानवनयन् मूर्धनि वध्वाः ३ प्रदक्षिणमग्निं परिक्रम्य ध्रुवं दर्शयति ध्रुवाद्यौरिति ४ अभिवाद्य गुरून् गोत्रेण विसृजेद्वाचम् ५ गौर्दक्षिणा ६ अत्रार्घ्यम् ७ आगतेष्वित्येके ८ त्रिरात्रं क्षारलवणे दुग्धमिति वर्जयन्तौ सह शयीयातां ब्रह्मचारिणौ ९ हविष्य-मन्नं परिजप्यान्नपाशेनेत्यसाविति वध्वा नाम ब्रूयात् १० भुक्त्वोच्छिष्टं वध्वै दद्यात् ११ ऊर्ध्वं त्रिरात्राच्चतसृभिराज्यं जुहुयात् अग्ने प्रायश्चित्तिरिति समस्त-पञ्चमीं सम्पातानवनयन्नुदपात्रे १२ तेनैनां सकेशनखामाप्लावयेत् १३ ततो यथार्थं स्यात् १४ ऋतुकाले दक्षिणेन पाणिनोपस्थमालभेद्विष्णुर्योनिं कल्प-यत्विति समाप्तायाम् १५ सम्भवेद्गर्भं धेहीति १६

इति चतुर्थः खण्डः

यस्मिन्नग्नौ पाणिं गृह्णीयात्स गृह्यः १ यस्मिन्वाऽन्त्यां समिधमादध्यात् २ निर्मन्थ्यो वा पुण्यस्सोऽनर्धुकः ३ अम्बरीषाद्वाऽऽनयेत् ४ वहुयाजिनो वाऽगाराच्छूद्रवर्जम् ५ सायमाहुत्युपक्रमं परिचरणम् ६ प्रागस्तमयोद-याभ्यां प्रादुष्कृत्य ७ अस्तमिते होमः ८ उदिते चानुदिते वा ९ हवि-ष्यस्यान्नस्याकृतं चेत् प्रक्षाल्य जुहुयात्पाणिना १० दधि चेत्पयो वा कंसेन ११ चरुस्थाल्या वा १२ अग्नये स्वाहेति मध्ये १३ तूष्णीं प्रागुदीचीमुत्त-राम् १४ सूर्यायेति प्रातः पूर्वाम् १५ नात्र परिसमूहनादीनि पर्युक्षणवर्जम् १६ पत्नी जुहुयादित्येके १७ गृहाः पत्नी गृह्योऽग्निरेष इति १८ सिद्धे सायंप्रातर्भूतमित्युक्त ओमित्युच्चैर्ब्रूयात् १९ मा क्षा नमस्त इत्युपांशु २० हविष्यस्यान्नस्य जुहुयात् प्राजापत्यं सौविष्टकृतं च २१ बलीन्नयेत् २२ बहिरन्तर्वा चतुर्निधाय २३ मणिकदेशे २४ मध्ये २५ द्वारि २६ श-य्यामनु २७ वर्चं वा २८ अथ सस्तूपम् २९ एकैकमुभयतः परिषिञ्चेत् ३० शेषमद्भिस्सार्धं दक्षिणा निनयेत् ३१ फलीकरणानामपामाचामस्येति विश्राणिते ३२ पृथिवी वायुः प्रजापतिर्विश्वेदेवा आप ओषधिवनस्पतय आकाशः कामो मन्युर्वा रक्षोगणाः पितरो रुद्र इति वलिदैवतानि ३३ तू-ष्णीं तु कुर्यात् ३४ सर्वस्य त्वन्नस्यैतत्कुर्यात् ३५ असकृच्चेदेकस्मिन् का-ले सिद्धे सकृदेव कुर्यात् ३६ बहुधा चेद्यद्गृहपतेः ३७ सर्वस्य त्वन्नस्या-

ग्नौ कृत्वाग्रं ब्राह्मणाय दत्वा स्वयं कुर्यात् ३८ व्रीहिप्रभृत्या यवेभ्यो य-
वेभ्यो वाव्रीहिभ्यः स्वयं हरेत् स्वयं हरेत् ३९

इति पञ्चमः खण्डः

इति प्रथमः पटलः

पौर्णमासोपक्रमौ दर्शपूर्णमासौ १ दार्शं चेत्पूर्वमुपपद्येत पौर्णमासेनेष्ट्वाऽथ तत्कुर्यात् २ अकुर्वन् पौर्णमासीमाकाङ्क्षेदित्येके ३ अपराह्णे स्नात्वौपवसथिकं दम्पती भुञ्जीयाताम् ४ मानतन्तव्य उवाच श्रेयसीं प्रजां विन्दते काम्यो भवत्यक्षोधुकी क्षोधुको य औपवसथिकं भुङ्क्ते ५ तस्माद्यत्कामयेत तद्भुञ्जीत ६ नाव्रत्यमाचरेत् ७ प्रातराहुतिं हुत्वा ८ हविनिर्निर्वपेदमुष्मै त्वा जुष्टं निर्वपामीति देवताश्रयं सकृद्यजुर्वा द्विस्तूष्णीम् ९ त्रिर्देवेभ्यः प्रक्षालयेत् १० द्विर्मनुष्येभ्यः ११ सकृत्पितृभ्यः १२ मेक्षणेन प्रदक्षिणमुदायुवं श्रपयेत् १३ शृतमभिघार्योदगुद्वास्य प्रत्यभिघारयेत् १४ सर्वाण्येवं हवींषि १५ बर्हिष्यासाद्य १६ आज्यभागौ जुहुयाच्चतुर्गृहीतमाज्यं गृहीत्वा पञ्चावत्तं भृगूणां जामदग्न्यानामग्नये स्वाहेत्युत्तरतस्सोमायेति दक्षिणतः १७ विपरीतमितरे १८ आज्यमुपस्तीर्य हविषोऽवद्येन्मेक्षणेन मध्यात्पुरस्तादिति १९ पश्चाच्च पञ्चावत्ती २० अभिघार्य प्रत्यनक्त्यवदानस्थानानि २१ न स्विष्टकृतः २२ अमुष्मै स्वाहेति जुहुयाद्यद्देवत्यं स्यात् २३ स्विष्टकृतस्सकृदुपस्तीर्य द्विर्भृगूणां सकृद्धविषो द्विरभिघार्याग्नये स्विष्टकृते स्वाहेति प्रागुदीच्यां जुहुयात् २४ समिधमाधाय २५ दर्भानाज्ये हविषि वा त्रिरवधायाग्रमध्यमूलान्यक्तं रिहाणा वियन्तु वय इत्यभ्युक्ष्याग्नावनुमहरेद् यः पशूनामधिपती रुद्रस्तन्तिचरो वृषा पशूनस्माकं मा हिंसीरेतदस्तु हुतं तव स्वाहेति २६ तद्यज्ञवास्तु २७ सर्वत्र कुर्यात् २८ हविरुच्छिष्टमुदगुद्वास्य ब्रह्मणे दद्यात् २९ पूर्णपात्रं दक्षिणा ३० यथोत्साहं वा ३१

इति प्रथमः खण्डः

आग्नेयस्थालीपाकोऽनाहिताग्नेर्दर्शपूर्णमासयोः १ अग्नीषोमीयः पौर्णमास्यामाहिताग्नेः २ ऐन्द्रो माहेन्द्रो वैन्द्राग्नो वाऽमावास्यायाम् ३ यथा वानाहिताग्नेः ४ सर्वमहः प्रातराहुतेस्स्थानम् ५ रात्रिस्सायमाहुतेः ६ सर्वो-

ऽपरपक्षः पौर्णमासस्य ७ पूर्वपक्षो दार्शस्य ८ अभोजनेन संतनुयादित्येके ९ अविद्यमाने हव्ये यज्ञियानां फलानि जुहुयात् १० पलाशानि वा ११ अपो वा १२ हुतं हि १३ प्रायश्चित्तमहुतस्य १४ आज्यं जुहुयाद्धविषो-ऽनादेशे १५ देवता मन्त्रानादेशे १६ प्रथमगर्भे तृतीये मासि पुंसवनम् १७ स्नातामहतेनाच्छाद्य हुत्वा पतिः पृष्ठतस्तिष्ठेत् १८ दक्षिणमंसमन्ववमृश्यान-न्तर्हितं नाभिदेशमभिमृशेत्पुमांसाविति १९ अथापरं न्यग्रोधशुङ्गामुभयतः-फलामस्रामामक्रिमिपरिसृप्तां त्रिस्सप्तैर्यवैः परिक्रीयोत्थापयेन्माषैर्वा सर्वत्रौ-षधयस्सुमनसो भूत्वाऽस्यां वीर्यं समाधत्तेयं कर्म करिष्यतीति २० आहृत्य वैहायसीं कुर्यात् २१ कुमारी ब्रह्मचारी व्रतवती वा ब्राह्मणी पेषयेदप्रत्या-हरन्ती २२ स्नातां संवेश्य दक्षिणे नासिकास्रोतस्यासिञ्चेत् पुमानग्निरिति २३ अथास्याश्चतुर्थे मासि षष्ठे वा सीमन्तोन्नयनम् २४ स्नातामहतेनाच्छाद्य हुत्वा पतिः पृष्ठतस्तिष्ठन्ननुपूर्वया फलवृक्षशाखया सकृत्सीमन्तमुन्नयेत् त्रिश्वेतया च शलल्याऽयमूर्जावतो वृक्ष इति २५ कृसरः स्थालीपाकः २६ उत्तरघृतमवे-क्षन्तीं पृच्छेत किं पश्यसीति २७ प्रजामिति वाचयेत् २८ प्रतिष्ठिते वस्तौ सोष्यन्तीहोमः २९ या तिरश्चीति द्वाभ्याम् ३० असाविति नाम दध्यात् ३१ तद्गुह्यम् ३२ प्राङ्नाभिकृन्तनात् स्तनदानाच्च व्रीहियवौ पेषयेच्छुङ्गावृता ३३ अङ्गुष्ठेनानामिकया चादाय कुमारं प्राशयेदियमाज्ञेति ३४ सर्पिश्च मेधां त इति ३५

इति द्वितीयः खण्डः

जननाज्ज्यौत्स्ने तृतीये तृतीयायां प्रातः स्नाप्य कुमारमस्तमिते शान्तासु दिक्षु पिता चन्द्रमसमुपतिष्ठेत् प्राञ्जलिः १ शुचिनाऽऽच्छाद्य माता प्रयच्छेदुद-क्छिरसम् २ अनुपृष्ठं गत्वोत्तरतस्तिष्ठेत् ३ यत्ते सुसीम इति तिसृभिरुप-स्थायोदञ्चं मात्रे प्रदाय यदद इत्यपामञ्जलिमवसिञ्चेत् ४ द्विस्तूष्णीम् ५ जननादूर्ध्वं दशरात्राच्छतरात्रात्संवत्सराद्वा नाम कुर्यात् ६ स्नाप्य कुमारं करिष्यत उपविष्टस्य शुचिनाऽऽच्छाद्य माता प्रयच्छेदुदक्छिरसम् ७ अ-नुपृष्ठं गत्योत्तरत उपविशेत् ८ हुत्वा कोसीति तस्य मुख्यान् प्राणानभिमृ-शेत् ९ असाविति नाम कुर्यात्तदेव मन्त्रान्ते १० मात्रे ११ प्रथममाख्याय १२ विप्रोष्यङ्गादङ्गादिति पुत्रस्य मूर्धानं परिगृह्णीयात् १३ पशूनां त्वेत्यभि-जिघ्रेत्

१४ तूष्णीं स्त्रियाः १५ तृतीये वर्षे चौलम् १६ तत्र नापित उ-ष्णोदकमादर्शः क्षुरो वौदुम्बरः पिञ्जूल्य इति दक्षिणतः १७ आनडुहो गो-मयः कृसरस्स्थालीपाको वृथापक्व इत्युत्तरतः १८ माता च कुमारमादाय १९ हुत्वाऽयमागादिति नापितं प्रेक्षेत्सवितारं ध्यायन् २० उष्णेनेत्युष्णोदकं प्रेक्षेद्वायुं ध्यायन् २१ आप इत्युन्देत् २२ विष्णोरित्यादर्शं प्रेक्षेदौदुम्बरं वा २३ ओषध इति दर्भपिञ्जूलीस्सप्तोर्ध्वाग्रा अभिनिधाय २४ स्वधित इत्यादर्शेन क्षुरेणौदुम्बरेण वा २५ येन पूषेति दक्षिणतस्त्रिः प्राञ्चं प्रोहेत् २६ सकृदायसेन प्रच्छिद्यानडुहे गोमये केशान् कुर्यात् २७ उन्दनप्रभृन्त्येवं प-श्चादुत्तरतश्च २८ त्र्यायुषमिति पुत्रस्य मूर्धानं परिगृह्य जपेत् २९ उदङ्ङु-त्सृप्य कुशली कारयेद्यथागोत्रकुलकल्पम् ३० अरण्ये केशान्निखनेयुः ३१ स्तम्बे निदधत्येके ३२ गौर्दक्षिणा ३३

इति तृतीयः खण्डः

अष्टमे वर्षे ब्राह्मणमुपनयेत् १ तस्या षोडशादनतीतः कालः २ एकादशे क्षत्रियम् ३ तस्या द्वाविंशात् ४ द्वादशे वैश्यम् ५ तस्या चतुर्विंशात् ६ कुशलीकृतमलंकृतमहतेनाच्छाद्य हुत्वाऽग्ने व्रतपत इति ७ उत्तरतोऽग्नेः प्रत्यङ्मुखमवस्थाप्याञ्जलिं कारयेत् ८ स्वयं चोपरि कुर्यात् ९ दक्षिणत-स्तिष्ठन्मन्त्रवान् ब्राह्मण आचार्यायोदकाञ्जलिं पूरयेत् १० आगन्त्रेति जपेत् प्रेक्षमाणे ११ को नामासीत्युक्तो देवताश्रयं नक्षत्राश्रयं वाऽभिवादनीयं नाम ब्रूयादसावस्मीति १२ उत्सृज्यापो देवस्य त इति दक्षिणोत्तराभ्यां हस्ता-भ्यामञ्जलिं गृह्णीयादाचार्यः १३ सूर्यस्येति प्रदक्षिणमावर्तयेत् १४ दक्षि-णमंसमन्ववमृश्यानन्तर्हितां नाभिमालभेत्प्राणानामिति १५ अथैनं परिद-द्यादन्तकप्रभृतिभिः १६ दक्षिणमंसं प्रजापतये त्वेति १७ सव्येन सव्यं देवाय त्वेति १८ ब्रह्मचार्यसीति १९ संप्रेष्योपविश्य दक्षिणजान्वक्तमञ्जलिकृतं प्रदक्षिणं मुञ्जमेखलामावध्नन्वाचयेदियं दुरुक्तादिति २० अधीहि भो इत्युपसीदेत् २१ तस्मा अन्वाह सावित्रीं पच्छोऽर्धर्चशस्सर्वामिति सावित्रीं वाचयेत् २२ महाव्याहृतीश्चैकैकशः २३ ओंकारं च २४ प्रयच्छत्यस्मै वार्क्षं दण्डम् २५ सुश्रवस्सुश्रवसं मेति २६ समिधमादध्यादग्नये समिधमिति २७ भैक्षं चरेत् २८ मातरमग्रे २९ अथान्यास्सुहृदः ३० आचार्याय भैक्षं

निवेदयेत् ३१ तिष्ठेदाऽस्तमयात्तूष्णीं ३२ त्रिरात्रं क्षारलवणदुग्धमिति वर्जयेत् ३३

इति चतुर्थः खण्डः

गोदाने चौलवत्कल्पः १ सलोमं वापयेत् २ गोऽश्वाविमिथुनानि दक्षिणाः पृथग्वर्णानाम् ३ सर्वेषां वा गौः ४ अजः केशप्रतिग्रहाय ५ उक्तमुपनयनम् ६ नाचरिष्यन्तं संवत्सरम् ७ अनियुक्तं त्वहतम् ८ तथालङ्कारः ९ अधस्संवेशी १० अमधुमांसाशी स्यात् ११ मैथुनक्षुरकृत्यस्नानावलेखनदन्तधावनपादधावनानि वर्जयेत् १२ नास्य कामे रेतस्स्कन्देत् १३ न गोयुक्तमारोहेत् १४ न ग्राम उपानहौ १५ मेखलाधारणभैक्षचर्यदण्डसमिदाधानोपस्पर्शनप्रातरभिवादा नित्यम् १६ गोदानव्रातिकादित्यव्रतौपनिषदज्येष्ठसामिकास्संवत्सराः १७ नादित्यव्रतमेकेषाम् १८ ये चरन्त्येकवाससो भवन्ति १९ आदित्यं च नान्तर्दधते २० नाचापोऽभ्युपयन्ति २१ शक्वरीणां द्वादश नव षट्त्रय इति विकल्पाः २२ कृष्णवस्त्रः २३ कृष्णभक्षः २४ आचार्याधीनः २५ तिष्ठेद्दिवा २६ आसीत नक्तम् २७ संवत्सरमेकेषां पूर्वैः श्रुताश्चेत् २८ उपोषिताय परिणद्धाक्षायानुगापयेत् २९ यथा मा न प्रधक्ष्यतीति तं प्रातरभिवीक्षयन्ति यान्यप्रधक्ष्यन्ति मन्यन्तेऽपोऽग्निं वत्समादित्यम् ३० अपोऽभिव्यख्यमित्यपो ज्योतिरभिव्यख्यमित्यग्निं पशूनभिव्यख्यमिति वत्सं सुरभिव्यख्यमित्यादित्यं विसृजेद्वाचम् ३१ गौर्दक्षिणा ३२ कंसो वासो रुक्मश्च ३३ अनुप्रवचनीयेष्वृचं साम सदसस्पतिमिति चाज्यं जुहुयात् ३४ चित्ययूपोपस्पर्शनकर्णक्रोशाक्षिवेपनेषु सूर्याभ्युदितस्सूर्याभिनिर्मुक्त इन्द्रियैश्च पापस्पर्शैः पुनर्मामित्येताभ्यामाहुतिं जुहुयात् ३५ आज्यलिप्ते वा समिधौ ३६ जपेद्वा लघुषु जपेद्वा लघुषु ३७

इति पञ्चमः खण्डः

इति द्वितीयः पटलः

आप्लवने पुरस्तादाचार्यकुलस्य परिवृत आस्ते १ उदङ्मुख आचार्यः प्रागग्रेषु २ एवं ब्रह्मवर्चसकामः ३ गोष्ठे पशुकामः ४ सभायां यशस्कामः ५ सर्वौषधेनापः फाणयेत् ६ सुरभिभिश्च ७ ताभिश्शीतोष्णाभिराचार्योऽभिषिञ्चेत् ८ स्वयं वा मन्त्राभिवादात् ९ उभावित्येके तेनेममित्याचार्यो

ब्रूयात् १० ये अप्स्वित्यपामञ्जलिमवसिञ्चेत् ११ यदपामिति च १२ तूष्णीं च १३ यो रोचन इति गृह्यात्मानमभिषिञ्चेत् १४ येन स्त्रियमिति च १५ तूष्णीं च १६ उद्यन्नित्यादित्यमुपतिष्ठेत् १७ समस्येद्वा १८ विहरन्ननुसंहरेच्चक्षुरसीति १९ उदुत्तममिति मेखलामवमुञ्चेत् २० प्राश्यवापयेच्छिखावर्जं केशश्मश्रुलोमनखानि २१ अलंकृतोऽहतवाससा श्रीरिति स्रजं प्रतिमुञ्चेत् २२ नेत्र्यौ स्थ इत्युपानहौ २३ वैणवं दण्डमादध्यात् गन्धर्वोऽसीति २४ उपेत्याचार्यं परिषदं प्रेक्षेद्यक्षमिवेति २५ उपबिष्यौष्ठापिधानेति मुख्यान् प्राणानभिमृशेत् २६ गोयुक्तं रथमालभेत् वनस्पत इति २७ आस्थाता त इत्यारोहेत् २८ प्राचीं प्रयायोदीचीं वा प्रदक्षिणमावर्तयेत् २९ प्रत्यागतायार्घ्यमित्येके ३० वृद्धशीली स्यादत ऊर्ध्वम् ३१ नाजातलोम्न्योपहासमिच्छेत् ३२ नायुग्वा ३३ न रजस्वलया ३४ न समानर्ष्या ३५ अपरया द्वारा प्रपन्नद्भिःपक्वपर्युषितानि नाश्नीयात् ३६ अन्यत्र शाकमांसयवपिष्टविकारेभ्यः ३७ पायसाच्च ३८ फलप्रचयनोदपानावेक्षणवर्षतिधावनोपानत्स्वयंहरणानि न कुर्यात् ३९ नागन्धां स्रजं धारयेन्न चेद्धिरण्यस्रक् ४० भद्रमिति न वृथा व्याहरेत् ४१ पुष्टिकामो गाः प्रकालयेतेमा म इति ४२ प्रत्यागता इमा मधुमतीरिति ४३ पुष्टिकाम एव प्रथमजातस्य वत्सस्य प्राङ्मातुः प्रलेहनाल्ललाटमुल्लिह्य निगिरेत् गवामिति ४४ संप्रजातासु गोष्ठे निशायां विलयनं जुहुयात् संग्रहेणेति ४५ अथापरं वत्समिथुनवोः कर्णे लक्षणं कुर्यात् भुवनमिति ४६ पुंसोऽग्रे ४७ लोहितेनेत्यनुमन्त्रयेत ४८ तन्तीं प्रसारितामियं तन्तीति ४९

इति प्रथमः खण्डः

श्रावण्यां पौर्णमास्यां गृह्यादग्निमतिप्रणीय प्रतिदिशमुपलिम्पेदधिके प्रक्रमे १ सकृद्गृहीतान् सक्तून् दर्व्यां कृत्वा पूर्वोपलिप्ते निनीयापो यः प्राच्यामिति वलिं निर्वपेत् २ निनयेदपां शेषम् ३ अप उपस्पृश्यैवं प्रतिदिशं यथालिङ्गम् ४ दक्षिणपश्चिमे अन्तरेणाग्निं च संचरः ५ शूर्पेण शिष्टानग्नावोप्यातिप्रणीतादनतिप्रणीतस्यार्धं गत्वा न्यञ्चौ पाणी कृत्वा नमः पृथिव्या इति जपेत् ६ तत उत्थाय सोमो राजेति दर्भस्तम्बमुपस्थाय ७ अक्षतानादाय प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य जुहुयादञ्जलिना हये राक इति चतसृभिः ८

प्राङुत्क्रम्य जपेद्वसुवन एधीति त्रिस्त्रिः प्रतिदिशमवान्तरदेशेषु च ९ ऊर्ध्वं प्रेक्षन् देवजनेभ्यः १० तिर्यङ्ङितरजनेभ्यः ११ अवाङ्प्रेक्षन् प्रत्येत्यान-वेक्षन्नक्षतान् प्राश्नीयात् १२ श्वोभूतेऽक्षतसक्तून् कृत्वा नवे पात्रे निधाया-स्तमिते बलीन् हरेदाऽऽग्रहायरयाः १३ प्रौष्ठपदीं हस्तेनाध्यायानुपाकुर्युः १४ श्रावणीमित्येके १५ हुत्वोपनयनवत् १६ सावित्रीमनुवाचयेत् १७ सोमं राजानं पर्वादींश्च १८ धाना दधि च प्राश्नीयुरभिरूपाभ्याम् १९ श्वोभूते प्राधीयीरञ्शिष्येभ्यः २० अनुवाक्याः कुर्युर्ऋगादिभिः प्रस्तावैश्च २१ अनुगानं रहस्यानाम् २२ विद्युत्स्तनयित्नुवर्जम् २३ अर्धपञ्चमान्मासानधीत्य पौ-षीमुत्सर्गः २४ तत ऊर्ध्वमभ्रानध्यायः २५ विद्युत्स्तनयित्नुपृषितेषु च २६ त्रिसन्निपाते त्रिसन्ध्यम् २७ अष्टकाममावास्यां चातुर्मासीरुदगयने च पक्षिणीं रात्रीम् २८ सब्रह्मचारिणि च प्रेते २९ उल्कापाते भूमिचले ज्योतिषोश्चोपसर्ग एतेष्वाकालिकं विद्यात् ३० कार्ष्वं तु कठकौथुमाः ३१

इति द्वितीयः खरडः

आश्वयुजीं रुद्राय पायसः १ मा नस्तोक इति जुहुयात् २ पयस्यवनयेदा-ज्यं तत्पृषातकम् ३ तेनाभ्यागता गा उक्षेदा नो मित्रावरुणेति ४ वत्सांश्च मातृभिस्सह वासयेत् तां रात्रिम् ५ नवयज्ञे पायस ऐन्द्राग्नः ६ शतायु-धायेति चतसृभिराज्यं जुहुयादुपरिष्टात् ७ अग्निः प्राश्नात्विति च ८ त-स्य शेषं प्राश्नीयुर्यावन्त उपेताः ९ उपस्तीर्यापो द्विर्नवस्यावद्येत् १० त्रि-र्भृगूणाम् ११ अपां चोपरिष्टात् १२ भद्रान्न इत्यसंखाद्य प्रगिरेत्त्रिस्त्रिः १३ एतमु त्यमिति वा यवानाम् १४ अमोसीति मुख्यान् प्राणानभिमृशेत् १५ आग्रहायणकर्म श्रावणेन व्याख्यातम् १६ नमः पृथिव्या इति न जपेत् १७ प्रदोषे पायसस्य जुहुयात् प्रथमेति १८ न्यञ्चौ पाणी कृत्वा प्रतिक्षत्र इति जपेत् १९ पश्चादग्नेः स्वस्तरमुदगग्रैस्तृणैरुदक्प्रवणमास्तीर्य तस्मिन्नास्तरणे गृहप-तिरास्ते २० अनुपूर्वमितरे २१ अनन्तरा भार्या पुत्राश्च २२ न्यञ्चौ पाणी कृत्वा स्योनेति गृहपतिर्जपेत् २३ समाप्तायां दक्षिणैः पार्श्वैस्संविशेयुस्त्रिस्त्रिरभ्या-त्ममावृत्य २४ स्वस्त्ययनानि कुर्युः २५ ततो यथार्थं स्यात् २६ ऊर्ध्वमाग्र-हायरयास्तिस्रस्तामिस्राष्टम्योऽष्टका इत्याचक्षते २७ तासु स्थालीपाकाः २८ अष्टौ चापूपाः प्रयमायाम् २९ तानपरिवर्तयन् कपाले श्रपयेत् ३० उत्तमायां

शाकमन्वाहार्ये ३१ अष्टकायै स्वाहेति जुहुयात् ३२

इति तृतीयः खण्डः

मध्यमायां गौः १ तां पुरस्तादग्नेः प्रत्यङ्मुखीमवस्थाप्य जुहुयाद्यत्पशव इति २ हुत्वा चानुमन्त्रयेतानु त्वेति ३ यवमतीभिरद्भिः प्रोक्षेदष्टकायै त्वा जुष्टं प्रोक्षामीति ४ प्रोक्ष्योल्मुकेन परिहृत्य प्रोक्षणीः पाययेत् ५ उदङ्ङुत्सृप्य प्रत्यक्छिरसमुदक्पदीं संज्ञपयेत् ६ संज्ञप्तायां जुहुयाद्यत्पशुरिति ७ तस्याः पत्नी स्रोतांसि प्रक्षालयेत् ८ पवित्रे अन्तर्धायोत्कृत्य वपामुद्धारयेत् ९ यज्ञियस्य वृक्षस्य विशाखाशाखाभ्यां परिगृह्याग्नौ श्रपयेत् १० प्रसृतायां विशसेत् ११ उक्तमुपस्तरणाभिघारणं यथा स्विष्टकृतः १२ अष्टकायै स्वाहेति जुहुयात् १३ सर्वाङ्गेभ्योऽवदानान्युद्धारयेत् १४ न सव्यात्सक्थ्नः १५ न क्लोम्नः १६ सव्यं सक्थि निधाय १७ पृथङ्गेक्षणाभ्यामवदानानि स्थालीपाकं च श्रपयित्वा १८ कंसे रसं प्रस्राव्य २९ प्लक्षशाखास्ववदानानि कृत्वा २० एकैकस्मात् कंसेऽवद्येत् २१ स्थालीपाकाच्च २२ चतुर्गृहीतमष्टगृहीतं वात्र जुहुयादग्नाविति २३ कंसात्पराभिर्द्वाभ्यांद्वाभ्यामेकैकामाहुतिम् २४ सौविष्टकृतमष्टम्या २५ वह वपामिति पित्र्ये वपाहोमः २६ जातवेद इति दैवत्ये २७ तदादेशमनाज्ञाते २८ यथाऽष्टकाया इति २९ पशुरेव पशोर्दक्षिणा ३० स्थालीपाकस्य पूर्णपात्रम् ३१

इति चतुर्थः खण्डः

नवमीं दशमीं वान्वष्टक्यम् १ दक्षिणपूर्वभागे परिवार्य तत्रोत्तरार्धे मथित्वाऽग्निं प्रणयेत् २ सकृद्गृहीतान् व्रीहीन् सकृत् फलीकृतान् प्रसव्यमुदायुवं श्रपयेत् ३ अमुष्माच्च सक्थ्नो मांसमिति ४ दक्षिणोद्वास्य न प्रत्यभिघारयेत् ५ पश्चादग्नेर्दक्षिणतस्तिस्रः कर्षूः खन्याच्चतुरङ्गुलमधस्तिर्यक् ६ तासां पुरस्तादग्निं प्रणयेत् ७ स्तृणुयात् ८ कर्षूश्च ९ पश्चादग्नेः स्वस्तरं दक्षिणाग्रैस्तृणैर्दक्षिणाप्रवणमास्तीर्य वृसीमुपरिनिदध्यात् १० तस्मिन्नेकैकमाहरेत् ११ कंसे सम-वदाय मेक्षणेनोपघातं जुहुयात् स्वाहा सोमाय पितृमते स्वाहाऽग्नये कव्यवाहनायेति १२ सव्येनोल्मुकं दक्षिणतः कर्षूषु निदध्यादपहता इति १३ पूर्वस्यां कर्ष्वां पितुः १४ मध्यमायां पितामहस्योत्तमायां प्रपितामहस्य १५

उदपात्राएयपसलवि कर्षूषु निनयेदेकैकस्य नामोक्त्वासाववनेनिच्व ये चात्र त्यानुयांश्च त्वमनु तस्मै ते स्वधेति १६ तथैव पिराडान्निधाय जपेदत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति १७ उक्त्वोदङ्ङावर्तेत सव्यं बाहुमुप-संहृत्य प्रसव्यमावृत्य १८ उपताम्य कल्याणं ध्यायन्नभिपर्यावर्तमानो जपेत् अमी मदन्त पितरो यथाभागमावृषायिषतेति १९ तिस्रो दर्भपिञ्जूलीरञ्जने निघृष्य कर्षूषु निदध्याद्यथापिराडम् २० तैलं सुरभि च २१ पिराडप्रभृति यथार्थमूहेत् २२ अथ निह्नवनम् २३ पूर्वस्यां कर्ष्वां दच्चिणोत्तानौ पाणी कृत्वा नमो वः पितरो जीवाय नमो वः पितरश्शूषायेति २४ सव्योत्तानौ मध्यमायां नमो वः पितरो घोराय नमो वः पितरो रसायेति २५ दच्चिणोत्तानौ पश्चिमायां नमो वः पितरः स्वधायै नमो वः पितरो मन्यव इति २६ अञ्जलिं कृत्वा नमो व इति २७ सूत्रतन्तून् कर्षूषु निदध्याद्यथापिराडमेतद्व इति २८ ऊर्जं वहन्तीरिति कर्षूरनुमन्त्रयेत २९ मध्यमं पिराडं पुत्रकामां प्राशयेदाधत्तेति ३० अभून्नो दूत इत्युल्मुकमग्नौ प्रच्चिपेत् ३१ द्वंद्वं पात्राएयतिहरेयुः ३२ एष एव पिराडपितृयज्ञकल्पः ३३ गृह्येऽग्नौ हविः श्रपयेत् ३४ तत एवातिप्रणयेत् ३५ एका कर्षूः ३६ न स्वस्तरः ३७ इन्द्राराया स्थालीपाकस्यैकाष्टकेति जुहुयात् ३८

इति पञ्चमः खराडः

इति तृतीय पटलः

काम्येषु षड्भक्तानि त्रीणि वा नाश्नीयात् १ नित्यप्रयुक्तानामादितः २ उपरिष्टात्सान्निपातिके ३ एवं यजनीयप्रयोगेषु ४ अर्धमासव्रती ५ अश-क्तौ पेयमेकं कालम् ६ अरराये प्रपदं जपेदासीनः प्रागग्रेषु ७ एवं ब्रह्म-वर्चसकामः ८ यथोक्तं पशुकामः ९ सहस्रबाहुरिति पशुस्वस्त्ययनकामो व्रीहियवौ जुहुयात् १० येनेच्छेत्सहकारं कौतोमतेनास्य महावृच्चफलानि परिजप्य दद्यात् ११ अर्धमासव्रती पौर्णमास्यां रात्रौ नाभिमात्रं प्रगाह्यावि-दासिनि ह्रदेऽच्चततराडुलानास्येन जुहुयादुदके वृच्च इवेति पञ्चभिः पार्थिवं कर्म १२ प्रथमयादित्यमुपतिष्ठेद्भोगकामोऽर्थपतौ प्रेच्चमाणे १३ द्वितीययाऽच्च-ततराडुलानादित्ये परिविष्यमाणे बृहत्पत्रस्वस्त्ययनकामः १४ तृतीयया च-न्द्रमसि तिलतराडुलान् च्चुद्रपशुस्वस्त्ययनकामः १५ चतुर्थ्यादित्यमुपस्थाय

गुरुमर्थमभ्युत्तिष्ठेत् १६ पञ्चम्याऽऽदित्यमुपस्थाय गृहानेयात् १७ अनकाममारं नित्यं जपेत् भूरिति १८ यजनीये जुहुयान्मूर्ध्नोऽधि म इति षड्भिर्वामदेव्यर्ग्भिर्महाव्याहृतिभिः प्राजापत्यया च १९ अलक्ष्मीनिर्णोदः २० अक्षेमे पथ्यपेहीति जपेत् २१ यशोऽहमित्यात्यिमुपतिष्ठेद् यशस्कामः पूर्वाह्णमध्यन्दिना पराह्णेषु २२ प्रातरह्नस्येति यथार्थमूहेत् २३ आदित्यनावमिति सन्ध्योपस्थानं स्वस्त्ययनम् २४ उद्यन्तं त्वेति पूर्वां प्रतितिष्ठन्तं त्वेति पश्चिमाम् २५

इति प्रथमः खण्डः

अर्धमासव्रती तामिस्रादौ ब्राह्मणानाशयेत् व्रीहिकंसौदनम् १ तस्य कणानपरासु सन्ध्यासु प्रत्यग्ग्रामात् स्थण्डिलमुपलिप्य भलायेति जुहुयाद्भल्लायेति च २ एवमेवापरस्मिंस्तामिस्रादौ ३ ब्रह्मवर्यमासमाप्तेः ४ आचितशतं भवति ५ गौरे भूमिभागे ब्राह्मणो लोहिते क्षत्रियः कृष्णे वैश्योऽवसानं जोषयेत् समं लोमशमनिरिणमशुष्कम् ६ यत्रोदकं प्रत्यगुदीचीं प्रवर्तेत ७ अक्षीरिणः कण्डकिनः कटुकाश्चात्रौषधयो न स्युः ८ दर्भसंमितं ब्रह्मवर्चस्यम् ९ बृहत्तृणैर्बल्यम् १० मृदुतृणैः पशव्यम् ११ यत्र वा स्वयं कृताः श्वभ्रास्सर्वतोऽभिमुखाः स्युः १२ प्राग्द्वारं धन्यं यशस्यं चोदग्द्वारं पुत्र्यं पशव्यं च दक्षिणापश्चिमद्वारे सर्वे कामा अनुद्वारं गेहद्वारम् १३ असंलोकी स्यात् १४ पयसो हविः १५ कृष्णा च गौः १६ अजो वा श्वेतः पायस एव वा १७ मध्ये वेश्मनो वसां पायसं चाज्येन मिश्रमष्टगृहीतं जुहुयाद्वास्तोष्पत इति १८ याश्च पराः १९ सप्तालक्ष्मीनिर्णोदे ताभिश्च २० हुत्वा दिशां बलीन् नयेत् २१ अवान्तरदिशां चोर्ध्वावाचिभ्यां च २२ एवं संवत्सरे संवत्सरे नवयज्ञयोर्वा २३ वशंगमावित्येताभ्यामाहुती जुहुयाद्यमिच्छेद्वशमायान्तं तस्य नाम गृहीत्वाऽसाविति वशी हास्य भवति २४

इति द्वितीयः खण्डः

अर्धमासव्रती पौर्णमास्यां रात्रौ शंकुशतं जुहुयादेकाक्षर्ययायसान्वयकामः १ खादिरानायुष्कामोऽथापरम् २ प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य स्थण्डिलं समूह्य पर्वते वाऽऽरण्यैर्गोमयैस्तापयित्वाऽङ्गारानपोह्यास्येन जुहुयात् ३ द्वादश ग्रामा

ज्वलिते ४ त्र्यवरा धूमे ५ कम्बूकान् सायंप्रातर्जुहुयान्नास्य वृत्तिः क्षीयते ६ इदमहमिममिति पण्यहोमं जुहुयात् ७ पूर्णहोमं यजनीये जुहुयात् ८ इन्द्रामवदादिति सहायकामः ९ अष्टरात्रोपोषितः प्राङ्वोदङ्वा ग्रामाच्च-तुष्पथे समिद्धयाग्निमौदुम्बर इध्मः स्यात् स्रुवचमसौ च जुहुयादन्नं वा इति श्रीर्वा इति १० ग्रामे तृतीयामन्नस्येति ११ आधिपत्यं प्राप्नोति १२ उपतापिनीषु गोष्ठे पायसं जुहुयात् १३ अक्षेमे पथि वस्त्रदशानां ग्रन्थीन्कुर्यात् सहायिनां च स्वस्त्ययनानि १४ क्षुधे स्वाहेत्येताभ्यामाहुतिसहस्रं जुहुयादाचि-तसहस्रकामः १५ वत्समिथुनयोः पुरीषेण पशुकामोऽविमिथुनयोः क्षुद्रप-शुकामः १६ हरितगोमयेन सायम्प्रातर्जुहुयाद् नास्य वृत्तिः क्षीयते १७

इति तृतीयः खण्डः

विषवता दष्टमद्भिरभ्युक्षन् जपेन्मा भैषीरिति १ स्नातकस्सविशन् वैणवं दण्डमुपनिदध्यात्तुरगोपायेति स्वस्त्ययनम् २ हतस्त इति क्रिमिवन्तं देश-मद्भिरभ्युक्षञ्जपेत् ३ पशूनां चेदपराह्णे सीतालोष्टमाहृत्य तस्य प्रातः पांसुभिः प्रतिष्किरञ्जपेत् ४ मधुपर्कं प्रतिगृहीष्यन्निदमहमिमामिति प्रतितिष्ठन् जपेत् ५ अर्हयत्सु वा ६ विष्टरपाद्यार्घ्याचमनीयमधुपर्काणामेकैकं त्रिर्वेदयन्ते ७ गां च ८ उदञ्चं विष्टरमास्तीर्य या ओषधीरित्यध्यासीत ९ पादयोर्द्वितीयया द्वौ चेत् १० अपः पश्येत् यतो देवीरिति ११ सव्यं पाद-मवसिञ्चेत् सव्यमिति १२ दक्षिणं दक्षिणमिति १३ उभौ शेषेण १४ अ-न्नस्य राष्ट्रिरसीत्यर्घ्यं प्रतिगृह्णीयात् १५ यशोऽसीत्याचमनीयम् १६ यश-सो यशोऽसीति मधुपर्कम् १७ त्रिः पिबेद्यशसो महसः श्रिया इति १८ तूष्णीं चतुर्थम् १९ भूहोऽपिपाय ब्राह्मणायोच्छिष्टं दद्यात् २० गां वेदितामनुमन्त्रयेत मुञ्च गामित्यमुष्य चेत्यर्हयितुर्नामब्रूयात् २१ एवमयज्ञे २२ कुरुतेति यज्ञे २३ आचार्य ऋत्विक् स्नातको राजा विवाह्यः प्रिय इति षडर्घ्याः २४ प्रतिसंवत्सरानर्हयेत् २५ पुनर्यज्ञविवाहयोश्च पुनर्यज्ञविवाहयोश्च २६

इति चतुर्थः खण्डः

इति चतुर्थः पटलः

समाप्तं खादिरं गृह्यसूत्रम्